ॐ

तैत्तिरीय-
पञ्चसूक्त

अथ तैत्तिरीय-

पञ्चसूक्तम् ।

(पुरुषसूक्ताद्युपयुक्त-वेदभागः)

संस्करण : जनवरी २००९, सम्वत् २०६५

मूल्य ८ रुपये मात्र।

सर्वाधिकार प्रकाशक द्वारा सुरक्षित

Printers & Publishers :
Khemraj Shrikrishnadass Prop: Shri Venkateshwar Press, Khemraj Shrikrishnadass Marg, 7th Khetwadi, Mumbai - 400 004.

Web Site : http://www.Khe-shri.com
Email : khemraj@vsnl.com

Printed by Sanjay Bajaj For M/s.Khemraj Shrikrishnadass Proprietors Shri Venkateshwar Press, Mumbai-400 004, at their Shri Venkateshwar Press, 66 Hadapsar Industrial Estate, Pune 411 013

श्रीमते रामानुजाय नमः ॥

हरिः ॐ तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्ति रस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शं चतुष्पदे । ॐ शांतिः शांतिः शांतिः ॥

हरिः ॐ सहस्रशीर्षा पुरुषः । सह

पु० स्राक्षः सहस्रपात् ॥ सभूमिं विश्वतो सू०
२ वृत्वा । अत्यतिष्ठद्दशांगुलम् ॥ १ ॥ पुरुष
एवेदꣳसर्वम् । यद्भूतं यच्च भव्यम् ॥
उतामृतत्वस्येशानः । यदन्नेनातिरोहति
॥ २ ॥ एतावानस्य महिमा । अतो
ज्यायाꣳश्च पूरुषः ॥ पादोऽस्य विश्वा २
भूतानि । त्रिपादस्यामृतं दिवि ॥ ३ ॥

त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाभवा
त्पुनः ॥ ततो विष्वङ् व्यक्रामत् । साश
नानशने अभि ॥ ४ ॥ तस्माद्विराडजा
यत । विराजो अधिपुरुषः ॥ स जातो
अत्यरिच्यत । पश्चाद्भूमिमथो पुरः ॥५॥
यत्पुरुषेण हविषा । देवा यज्ञमतन्वत ।
वसंतोऽस्यासीदाज्यम् ॥ ग्रीष्म इध्मः

शरद्धविः ॥ ६ ॥ सप्तास्यासन् परि-
धयः । त्रिस्सप्त समिधः कृताः ॥ देवा
यद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम्
॥ ७ ॥ तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं
जातमग्रतः ॥ तेन देवा अयजंत ।
साध्या ऋषयश्च ये ॥ ८ ॥ तस्मा
द्यज्ञात्सर्वहुतः । संभृतं पृषदाज्यम् ॥

पशूꣳस्ताꣳश्चक्रे वायव्यान् । आर
ण्यान् ग्राम्याश्च ये ॥ ९ ॥ तस्माद्य
ज्ञात्सर्वहुतः । ऋचस्सामानि जज्ञिरे ॥
छंदाꣳसि जज्ञिरे तस्मात् । यजुस्त
स्मादजायत ॥ १० ॥ तस्मादश्वा
अजायंत । ये के चोभयादतः ॥ गावो
ह जज्ञिरे तस्मात् । तस्माज्जाता अजा

पु० वयः ॥ ११॥ यत्पुरुषं व्यदधुः । कतिधा सू०
४ व्यकल्पयन् ॥ मुखं किमस्य कौ बाहू ।
कावूरू पादावुच्येते ॥ १२ ॥ ब्राह्म
णोऽस्य मुखमासीत् । बाहू राजन्यः
कृतः। ऊरू तदस्य यद्वैश्यः । पद्भ्याᳪं
शूद्रो अजायत ॥ १३ ॥ चन्द्रमा ४
मनसो जातः । चक्षोस्सूर्यो अजायत॥

मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजा
यत ॥ १४ ॥ नाभ्या आसीदंतरिक्षम् ।
शीर्ष्णो द्यौस्समवर्तत ॥ पद्भ्यां भूमि
र्दिशः श्रोत्रात् । तथा लोकाँ अक
ल्पयन् ॥ १५ ॥ वेदाहमेतं पुरुषं
महांतम् । आदित्यवर्णं तमसस्तु पारे॥
सर्वाणि रूपाणि विचित्य धीरः ।

पु० नामानि कृत्वाऽभिवदन् यदास्ते॥ १६॥ सू०
८ धाता पुरस्ताद्यमुदाजहार। शक्रः
प्रविद्वान् प्रदिशश्चतस्रः॥ तमेवं विद्वा
नमृत इह भवति। नान्यः पंथा अय
नाय विद्यते॥ १७॥ यज्ञेन यज्ञमय
जंत देवाः। तानि धर्माणि प्रथमान्या ८
सन्॥ तेह नाकं महिमानस्सचंते। यत्र

पूर्वे साध्यास्संति देवाः ॥ १८ ॥ अद्भ्य
स्संभूतः पृथिव्यै रसाच्च । विश्वकर्मणः
समवर्तताधि । तस्य त्वष्टा विदधद्रूप
मेति । तत्पुरुषस्य विश्वमाजानमग्रे
॥ १९ ॥ वेदाहमेतं पुरुषं महांतम् । आदि
त्यवर्णं तमसः परस्तात् ॥ तमेवं विद्वा
नमृत इह भवति । नान्यःपंथा विद्यते

पु० ऽयनाय ॥ २० ॥ प्रजापतिश्चरति गर्भे सू०
६ अंतः । अजायमानो बहुधा विजायते ॥
तस्य धीराः परिजानंति योनिम् । मरी
चीनां पदमिच्छंति वेधसः ॥ २१ ॥ यो
देवेभ्य आतपति । यो देवानां पुरोहितः ॥
पूर्वो यो देवेभ्यो जातः । नमो रुचाय ६
ब्राह्मये ॥ २२ ॥ रुचं ब्राह्मं जनयंतः । देवा

अग्रे तदब्रुवन् ॥ यस्त्वेवं ब्राह्मणो विद्या
त् । तस्य देवा असन् वशे ॥२३॥ ह्रीश्च
ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे ॥
नक्षत्राणि रूपम् । अश्विनौ व्यात्तम् ॥
इष्टं मनिषाण । अमुं मनिषाण ॥ सर्वं
मनिषाण ॥२४॥ हरिः ॐ शांतिः ॥३॥

इति श्रीपुरुषसूक्तं सम्पूर्णम् ॥

 श्रीमते रामानुजाय नमः॥ सहस्रशीर्षं
 देवं विश्वाक्षं विश्वशंभुवम्।विश्वं नारायणं
देवमक्षरं परमं प्रभुम्॥१॥विश्वतः परमं
नित्यं विश्वन्नारायणꣳहरिम् । विश्वमे
वेदं पुरुषस्तद्विश्वमुपजीवति ॥ २ ॥ पतिं
विश्वस्यात्मेश्वरꣳ शाश्वतꣳ शिवमच्यु
तम् । नारायणं महाज्ञेयं विश्वात्मानं परा

यणम् ॥ ३ ॥ नारायणपरं ब्रह्म तत्त्वं नारा
यणः परः नारायणपरो ज्योतिरात्मा ना
रायणः परः ॥ ४ ॥ (नारायणपरोध्याता
ध्यानं नारायणः परः) यच्च किञ्चिज्जग
त्यस्मिन् दृश्यते श्रूयतेऽपि वा ॥ ५ ॥ अंत
र्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः।
अनंतमव्ययं कविं समुद्रेऽन्तं विश्वशं

 भुवम् ॥ ६ ॥ पद्मकोशप्रतीकाशꣳ हृदयं
 चाप्यधोमुखम् । अधो निष्ट्या वितस्त्यां
तु नाभ्यामुपरि तिष्ठति ॥ ७ ॥ हृदयं
तद्विजानीयाद्विश्वस्यायतन महत् ।
संततꣳ सिराभिस्तु लंबत्याकोशसन्नि
भम् ॥ ८ ॥ तस्यांत सुषरꣳसूक्ष्मं तस्मि
न्त्सर्वं प्रतिष्ठितम् । तस्य मध्ये महानग्नि

विश्वार्चिर्विश्वतोमुखः।९। सोऽग्रभुग्विभ
जंस्तिष्ठन्नाहारमजरःकविः (तिर्यगूर्ध्व
मधश्शायी रश्मयस्तस्य संतताः।१०।)
संतापयति स्वं देहमापादतलमस्तकम्।
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्य
वस्थितः॥११॥नीलतोयदमध्यस्था वि
द्युल्लेखेव भास्वरा। नीवारशूकवत्तन्वी

ना० पीताभास्यात्तनूपमा ॥१२॥ तस्याःशि सू०
१ शखाया मध्ये परमात्मा व्यवस्थितः।स
ब्रह्मा स शिवस्सेंद्रस्सोक्षरः परमःस्वराट्
॥१३॥ नारायणाय विद्महे। वासुदेवाय
धीमहि॥तन्नो विष्णुः प्रचोदयात्॥१४॥ १

इति श्रीनारायणसूक्तं संपूर्णम् ॥

श्रीमते रामानुजाय नमः॥ हरिः ओं
विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थि
वानि विममे रजाꣳसि । यो अस्कभा
यदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरु
गायो विष्णो रराटमसि विष्णोः पृष्ठमसि
विष्णो श्नप्त्रेस्थो विष्णोर स्यूरसि विष्णो
ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥

वि० तदस्य प्रियमभिपाथो अस्यां। नरो यत्र सू०
१० देवयवो मदंति। उरुक्रमस्य सहि बंधु
रित्था। विष्णोः पदे परमे मध्व उत्सः
॥ ३ ॥ प्रतद्विष्णुःस्तवते वीर्याय। मृगो
न भीमः कुचरो गिरिष्ठाः ॥ यस्योरुषु
त्रिषु विक्रमणेषु। अधिक्षियंति भुव १०
नानि विश्वा ॥ ४ ॥ परो मात्रया तनुवा

वृधान । न ते महित्वमन्वश्नुवंति ॥ उभे
ते विद्म रजसी पृथिव्या विष्णो देवत्वम्।
परमस्य वित्से॥५॥विचक्रमे पृथिवीमेष
एताम्। क्षेत्राय विष्णुर्मनुषे दशस्यन् ।
ध्रुवासो अस्य कीरयो जनासः । उरु
क्षितिं सुजनिमा चकार ॥ ६ ॥ त्रिर्देवः
पृथिवीमेष एताम् । विचक्रमे शतर्चसं

वि० महित्वा ॥७॥ प्रविष्णुरस्तु तवसस्तवी सू०
११ यान्। त्वेषꣳह्यस्य स्थविरस्य नाम ॥
अतो देवा अवंतु नो यतो। विष्णुर्विचक्रम
पृथिव्यास्सप्त धामभिः ॥८॥ इदं विष्णु
र्विचक्रमे। त्रेधा निदधे पदम् ॥ समूढम
स्य पाꣳसुरे ॥ त्रीणि पदा विचक्रमे। ११
विष्णुर्गोपा अदाभ्यः ॥ ततो धर्माणि

धारयन् ॥ विष्णोः कर्माणि पश्यत
यतो व्रतानि पस्पशे । इंद्रस्य युज्यस्स
खा ॥९ ॥ तद्विष्णोः परमं पदꣳ सदा
पश्यंति सूरयः । दिवीव चक्षुराततम् ॥
तद्विप्रासो विपन्यवा जागृवाꣳसस्स
मिंधते । विष्णोर्यत् परमं पदम् ॥ १० ॥

इति विष्णुसूक्तं सम्पूर्णम् ॥

श्रीमते रामानुजाय नमः ॥ हरिः ॐ
हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो ममा
वह ॥ १ ॥ तांम आवह जातवेदो लक्ष्मी
मनपगामिनीम् । यस्यां हिरण्यं विदेयं
गामश्वं पुरुषानहम् ॥२॥ अश्वपूर्वां रथ
मध्यां हस्तिनादप्रबोधिनीम् । श्रियं देवी

मुपह्वये श्रीर्मा देवी जुषताम् ॥ ३ ॥ कांसो
स्मितां हिरण्यप्राकारामार्द्रां ज्वलंतीं
तृप्तां तर्पयंतीम् । पद्मे स्थितां पद्म-
वर्णां तामिहोपह्वये श्रियम् ॥ ४ ॥
चन्द्रां प्रभासां यशसा ज्वलंतीं श्रिय
लोके देवजुष्टामुदाराम् । तां पद्मनेमीं
शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां

श्री० वृणे ॥ ५ ॥ आदित्यवर्णें तपसोऽधि सू०
१३ जातो वनस्पतिस्तव वृक्षोथ बिल्वः ।
तस्य फलानि तपसा नुदंतु मायान्त
रायाश्च बाह्याअ लक्ष्मीः ॥ ६ ॥ उपैतु
मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मिराष्ट्रेऽस्मिन् कीर्तिमृद्धिं १३
ददातु म ॥ ७॥ क्षुत्पिपासामलां ज्येष्ठा

मलक्ष्मीर्नाशयाम्यहम् । अभूतिम
समृद्धिं च सर्वां निर्णुद मे गृहात् ॥८॥
गंधद्वारां दुराधर्षां नित्यपुष्टां करी
षिणीम् । ईश्वरी१७ सर्वभूतानां तामि
होपह्वये श्रियम् ॥ ९ ॥ (श्रीर्मे भजतु
अलक्ष्मीर्मे नश्यतु) ॥ १० ॥ मनसः
काममाकूतिं वाचस्सत्यमशीमहि ।

श्री० पशूनाᳫंरूपमन्नस्य मयि श्रीः श्रय सू०
१४ तां यशः ॥ ११ ॥ कर्दमेन प्रजा भूता
मयि संभवकर्दमा । श्रियं वासय मे
कुले मातरं पद्ममालिनीम् ॥ १२ ॥
आपः सृजंतु स्निग्धानि चिक्लीत वस मे
गृहे। नि च देवीं मातरं श्रियं वासय मे १४
कुले ॥ १३ ॥ आर्द्रां पुष्करिणीं पुष्टिं

सुवर्णां हेममालिनीम् । सूर्यां हिरण्मयीं
लक्ष्मीं जातवेदो ममावह ॥ १४ ॥ आ
र्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालि
नीम् । चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो
मआवह ॥ १५ ॥ तां म आवह जातवेदो
लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं
प्रभूतं गावो दास्योऽश्वान् विंदेयं पुरुषा

नहम् ॥ १६ ॥ (यः शुचिः प्रयतो भूत्वा
जुहुयादाज्यमन्वहम् । श्रियः पंचदशर्चं
च श्रीकामः सततं जपेत् ॥ १७ ॥ आनंदः
कर्दमश्चैव चिक्लीत इति विश्रुतः । ऋष
यस्ते स्वयः पुत्राः स्वयं श्रीदेविदेवता
॥ १८ ॥ पद्मानने पद्मऊरुपद्माक्षी पद्म
संभवे । त्वं मां भजस्व पद्माक्षी येन

सौख्यं लभाम्यहम् ॥ १९ ॥ अश्वदायी
च गोदायी धनदायी महाधने । धनं मे
जुषतां देवि सर्वकामार्थसिद्धये ॥ २० ॥
पुत्रपौत्रधनं धान्यं हस्त्यश्वाश्वतरीगो
रथम् । प्रजानां भवतु माता आयुष्मंतं
करोतु माम् ॥ २१ ॥ चंद्राभां लक्ष्मीमीशा
नां सूर्याभां श्रियमैश्वरीम् । चंद्रसूर्याग्नि

सर्वांभां श्रीमहालक्ष्मीमुपास्महे ॥२२॥
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।
धनमिंद्रो बृहस्पतिर्वरुण धनमश्नुते
॥ २३ ॥ वैनतेय सोमं पिब सोम पिबतु
वृत्रहा। सोमं धनस्य सोमिनो मह्य ददातु
सोमिनि ॥२४॥ न क्रोधो न च मात्सर्य
न लोभो नाशुभा मतिः । भवंति कृत

पुण्यानां भक्तानां श्रीसूक्तं जपेत् सदा
॥२५॥वर्षंतु ते विभावरी जिह्वो अभ्रस्य
विद्युतः। रोहन्तु सर्वबीजान्यपब्रह्मद्विषो
जहि ॥२६॥)पद्मप्रिये पद्मिनि पद्महस्ते
पद्मालये पद्मदलायताक्षी । विश्वप्रिये
विष्णुमनोनुकूले त्वत्पादपद्मं मयि सन्नि
धत्स्वं ॥ २७ ॥ महादेव्यै च विद्महे ।

भू० विष्णुपत्न्यैच धीमहि ॥ तन्नो लक्ष्मीः सू०
१७ प्रचो दयात् ॥ २८ ॥

इति श्रीसूक्तं सपूर्णम् ।

श्रीमते रामानुजाय नमः॥ भूमिर्भूम्ना
द्यौर्वरिणातरिक्षं महित्वा।उपस्थे ते देव्य
दितेऽग्निमन्नादमन्नाद्यायादधे।आय गौः १७
पृश्निरक्रमीदसनन्मातरं पुनः ।१। पितरं

च प्रियं सुवः । त्रिॐशद्धाम विराजति
वाक्पतंगाय शिश्रिये । प्रत्यस्य वह
द्युभिः ॥ २ ॥ अस्य प्राणादपानत्यं-
तश्चरति रोचना । व्यख्यन्महिषः सुवः॥
यत्त्वा क्रुद्धः परो वपमन्युना यदवर्त्या
॥३॥ सुकल्पमग्ने तत्तव पुनस्तोद्दीपया
मसि ॥४॥ यत्ते मन्युपरोप्तस्य पृथिवी

सू० मनु दध्वसे । आदित्या विश्वे तद्देवा सू०
१८ वसवश्च समाभरन् ॥५॥(मनोज्योतिर्जु
षतमाद्यं विच्छिन्नं यज्ञ७ँ समिमं
दधातु । बृहस्पतिस्तनुतामिमन्नो विश्वे
देवा इह मादयंताम् ॥ ६ ॥ सप्त ते अग्ने
समिधः सप्त जिह्वाः सप्त ऋषयः सप्त १८
धाम प्रियाणि । सप्त होत्रा सप्तधा त्वा

यजंति सप्तयो निराप्नुनु स्वघृतेन पुनरू
र्जानि वर्तस्व पुनरग्नविषायुषा ॥७॥पुन
र्नःपाहि विश्वतःसहरय्या निवतस्व। अ
ग्नप्युन्वस्वधारय विश्वप्सिनि या विश्वत
स्पारि ॥८॥ हरिः ॐः शांतिः शांतिः ३ ॥
श्रीमते रामानुजाय नमः॥) मेदिनीदेवी
वसुंधरा स्याद्वसुधादेवी वासवी । ब्रह्म-

भू० वर्चसः पितृणा७ंश्रोत्रं चक्षुर्मनः ।देवी- सू०
१९ हिरण्यगर्भिणी देवी प्रसोदरी । रसने स
त्यायने सीद । समुद्रवती सावित्री हनो
देवीमह्यँगी । महोधरणी महोऽर्यंतिस्था
॥१॥शृंगे शृंगे यज्ञे यज्ञे विभीषणी । इंद्र
पती व्यापिनी सुरसित इह । वायुमती १९
जलशयनी श्रियं धाराजासत्यंधो परि

मेदिनी। सोपारिधत्तंगाय॥ २॥ विष्णुपत्नीं
महीं देवीं माधवीं माधवप्रियाम्। लक्ष्मीं
प्रियसखीं देवीं नमाम्यच्युतवल्लभाम्
॥ ३ ॥ ॐ धनुर्धरायै विद्महे सर्वसिद्धयै
च धीमहि। तन्नो धरा प्रचोदयात् ॥

इति श्रीभूसूक्तं संपूर्णम् ॥

भू० महीं देवीं विष्णुपत्नीमजूर्यां प्रतीची सू०
२० मनाꣳहविषा यजामः ॥ १ ॥ त्रधा
विष्णुरुरुगायो विचक्रमे महीं दिवं
पृथिवीमंतरिक्षम् ॥ २ ॥ तच्छ्रोणै
श्रवइच्छमाना पुण्यꣳश्लोकं यजमा
नाय कृण्वती ॥ ३ ॥ गृणाहि घृतवती २०
सवितराधिपत्यै पयस्वती रंतिराशानो

अस्तु ॥ ४ ॥ ध्रुवादिशां विष्णुपत्न्यघो
रास्येशाना सहसो या मनोता ॥ ५ ॥
बृहस्पतिर्मातरिश्वोतवायुः सध्रुवाना
वाता अभिनो गृणंतु ॥६॥ विष्टंभोदिवो
धरुणः पृथिव्याअस्येशाना जगतो वि
ष्णुपत्नी ॥ ७ ॥ (नीलादेव्यै च विद्महे।
श्रीभूसख्यै च धीमहि। तन्नो नीलाप्रचो

दयात् ॥ इक्षुशालीफलस्यरसाद्यैः पारि
जाततरुशोभितमूले । स्वर्णरत्नमणि
मंडपंमध्ये चिंतये सकललोकधरित्रीम्
॥ १ ॥ श्यामां विचित्रांशुकरत्नभूषितां
चतुर्भुजां तुङ्गपयोधरान्विताम् । इंदीवरे
द्वे नवशालिमंजरीं शुकं दधानामिव संभ
जामहे ॥ २ ॥)ॐ शांतिः शांतिः ३ ॥

सू० २१

अथ शान्तिपञ्चकम् ॥ शन्नो मित्रः शं वरुणः । शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पतिः । शन्नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । ॐ शान्तिश्शान्तिश्शान्तिः ॥ १ ॥ शन्नो मित्रश्शं वरुणः । शन्नो भवत्वर्यमा । शन्न

शां० इन्द्रो बृहस्पतिः । शन्नो विष्णुरुरुक्रमः । नमो पं०
ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि ।
त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् ।
सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् ।
आवीन्माम् । आवीद्वक्तारम् । ॐ शान्तिश्शान्ति
श्शान्तिः ॥ २ ॥ सहनाववतु । सहनौभुनक्तु ।
सहवीर्यङ्करवावहै । तेजस्विनावधीतमस्तु मा २२
विद्विषावहै । ॐ शान्तिश्शान्तिश्शान्तिः ॥ ३ ॥

नमो वाचे या चोदिता याचानुदिता तस्यै वाचे
नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो
मन्त्रकृद्भ्यो मन्त्रपतिभ्यो मामामृषयो मन्त्रकृतो
मन्त्रपतयःपरादुर्माऽहमृषीन्मन्त्रकृतो मन्त्रपतीन्
परादां वैश्वदेवीं वाचमुद्यासꣳशिवामदस्ताञ्जुष्टा-
न्देवेभ्यश्शर्म मे द्यौश्शर्म पृथिवी शर्म विश्वमिदं
जगत् । शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्मप्रजापती ।
भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो

वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये पं०
शां० तस्मा अहमिदमुपस्तरणमुपस्तृण उपस्तरणं मे
२३ प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्मापातं
प्राणापानौ मामाहासिष्टं मधुमनिष्ये मधुजनिष्ये
मधुवक्ष्यामि मधुवदिष्यामि मधुमतीन्देवेभ्यो
वाचमुद्यासꣳशुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा
अवन्तु शोभायै पितरोऽनुमदन्तु । ॐ शान्ति- २३
श्शान्तिशान्तिः ॥ ४ ॥ तच्छंयोरावृणीमहे । गातुं

यज्ञाय। गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः ।
स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् ।
शन्नो अस्तु द्विपदे । शं चतुष्पदे । ॐ शान्ति
श्शान्तिश्शान्तिः ॥ ६ ॥

इदं पुस्तकं कल्याणनगर्या श्रीकृष्णदासात्मज–गङ्गाविष्णु श्रेष्ठिना स्वकीये "लक्ष्मी-
वेङ्कटेश्वर" मुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम् ।

इति तैत्तिरीय-

पञ्चसूक्तम् ।

(पुरुषसूक्ताद्युपयुक्त-वेदभागः)

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५.

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१
दूरभाष - ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१

KHEMRAJ SHRIKRISHNADASS